## स्थागापापचो भावे। (९५/३२७३)

स्त्रियाम् इति वर्तते। स्थादिभ्यो धातुभ्यः स्त्रीलिङ्गे भावे क्तिन् प्रत्ययो भवति। [1]अङोऽपवादस्य (३.३.१०६/३२८३) (३.३.१०४/३२८१) बाधकः। [2]प्रस्थितिः। उद्गीतिः। [3]सङ्गीतिः। [4]प्रपीतिः। संपीतिः। पक्तिः। भावग्रहणमर्थान्तरनिरासार्थम्। कथमवस्था संस्था इति? व्यवस्थायामसञ्ज्ञायाम् (१.१.३४/२१८) इति ज्ञापकात् नात्यन्ताय बाधा भवति [5]इति॥

## मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः। (९६/३४२०)

भावे [6]स्त्रियाम् इति वर्तते। [7]मन्त्रे विषये वृषादिभ्यः धातुभ्यः क्तिन् प्रत्ययो भवति [8]उदात्तः। [9]प्रकृति-प्रत्यययोः विभक्तिविपरिणामेन सम्बन्धः। कस्मादेवं कृतम्? वैचित्र्यार्थम्। वृष्टिः (ऋ. १.३८.८)। इष्टिः (ऋ. ४.४.७)। पक्तिः (ऋ. ४.२४.५)। मतिः (ऋ.१.१४१.१)। वित्तिः (वा. सं. १८.१४)। भूतिः (वा. सं. १८.१४)। वीतिः (अ. वे. २०.६९.३)। रातिः (ऋ. १.३४.१)। [10]सर्वत्र सर्वधातुभ्यः सामान्येन [11]विहित एव क्तिन्। [12]उदात्तार्थं वचनम्। इषेस्तु 'इच्छा' (३.३.१०१/३२७८) इति निपातनं वक्ष्यति, ततः क्तिन्नपि[13] विधीयते। मन्त्रादन्यत्र [14]आदिरुदात्तः॥

## ऊतियूतिजूतिसातिहेतिकीर्तयश्च। (९७/३२७४)

मन्त्रे इति नानुवर्तते। ऊत्यादयः शब्दा निपात्यन्ते। उदात्तः [15]इति वर्तते। अवतेः 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' (६.४.२०/२६५४) इति ऊठ्। ऊतिः। स्वरार्थं वचनम्। यौतेर्जवतेश्च यूतिः, जूतिः। दीर्घत्वं च निपात्यते। [16]सातिः। स्यतेः इत्वाभावो निपात्यते, सनोतेर्वा 'जनसनखनां सञ्झलोः' (६.४.४२/२५०४) इत्यात्वे कृते स्वरार्थं निपातनम्। हन्तेर्हिनोतेर्वा हेतिः। कीर्तयतेः कीर्तिः॥

## व्रजयजोर्भावे क्यप्। (९८/३२७५)

उदात्तः [17]इत्येव। [18]व्रजयजोः धात्वोः स्त्रीलिङ्गे भावे क्यप् प्रत्ययो भवति उदात्तः[19]। क्तिनोऽपवादः। [20]व्रज्या। इज्या। पित्करणमुत्तरत्र तुगर्थम्॥

## सञ्ज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः। (९९/३२७६)

भावे इति न [21]स्वर्यते। पूर्व एवात्रार्थाधिकारः। समजादिभ्यो धातुभ्यः स्त्रियां[22] क्यप् प्रत्ययो भवति

---

1. उपस्थितिः संगीतिः उपसंगीतिः उद्गीतिः प्रगीतिः ङ. 2. उपस्थितिः ब. क. फ. ह. 3. उपसंगीतिः क. 4. प्रपीतिः नास्ति क. 5. इति नास्ति ह. 6. स्त्रियाम् नास्ति फ, वाक्यमिदं नास्ति ह. 7. मन्त्रविषये नास्ति ङ, सर्वधातुभ्यः नास्ति अ. फ. 8. स च इत्यधिकम् फ. 9. प्रथमान्तयोः इत्यधिकम् अ.ब.फ, इह प्रथमान्तयोः इत्यधिकम् ह. 10. सर्वत्र नास्ति ङ, सर्वधातुभ्यः नास्ति अ. फ. 11. क्तिन् विधीयते एव ह. 12. उदात्तार्थमिदं वचनम् अ. क. फ, उदात्तार्थमिदं ह. 13. अपि नास्ति फ. 14. आद्युदात्तः ह. 15. भावे स्त्रियाम् इत्यधिकम् ब. 16. स्यतेः इत्यधिकम् अ. ब. क. ह. 17. स्त्रियाम् इत्यधिकम् ब. 18. व्रजयज इत्येतयोः फ. 19. च इत्यधिकम् फ. 20. प्रव्रज्या ह. 21. स्मर्यते क. 22. विषये इत्यधिकम् फ.